ଓଡ଼ିଶା ରାଜ୍ୟ ମୁକ୍ତ ବିଶ୍ୱବିଦ୍ୟାଳୟ, ସମ୍ବଲପୁର, ଓଡ଼ିଶା
Odisha State Open University, Sambalpur, Odisha
Established by an Act of Government of Odisha.

# Master of Arts in Sanskrit (MASK)

## SK-06

## HISTORY OF CLASSICAL SANSKRIT LITERATURE

# Block -III

## ODISHAN SANSKRIT LITERATURE

UNIT- 1 VISHNUSARMA & VISVANATHA
UNIT-2 JIVADEVACHARYA
UNIT-3 HALADHARA MISHRA
UNIT-4 KRISHNANANDA

**MASK PROGRAMME**

**EXPERTS COMMITTEE**

**Prof. Prafulla Kumar Mishra, Former Vice-Chancellor, North Odisha University**

**Prof. Raghunath Panda , Retd. Prof, Utkal University**

**Prof. Gopal Krishna Dash, Retd. Prof. , Utkal University**

**Dr. Madhusudan Mishra, Controller of Exams , Sri Jagannath Sanskrit University, Puri**

**Dr. Harmohan Mishra , Reader ( Retd.)**

**Dr. Ka** GDPELQL 'DVK 5HDGHU LQ 6DQVNULW 6% :RPHQ¶V &ROOHJH

'U 'HEDEUDWD 0RKDSDWUD 6U /HFW ,Q 6DQVNULW (PDUWLGHYL :RP

'U 1LEHGLWD 3DWL /HFWXUHU LQ 6DQVNULW 6 % :RPHQ¶V &ROOHJH

**CONVENOR**

**Dr. Dillip Kumar Nayak , Reader in Odia ,**
**Former Officer In Charge, Regional Centre, B.J.B Auto. College Bhubaneswar**

**COURSE WRITER**

**Dr. Subash Chandra Dash , Utkal University , Vanivihar**

**COURSE EDITOR**

**Edited by ±SLM Editorial group , OSOU**

**PROGRAMME COORDINATOR**

**Dr. Sareeta Pujari , Senior Academic Consultant, OSOU , Sambalpur**

**Mr. Pratap Kumar Meher , Academic Consultant , Sanskrit , OSOU, Sambalpur**

**MATERIAL PRODUCTION**

**Dr. Manas Ranjan Pujari**
**Registrar**
**Odisha State Open University, Sambalpur**

(cc) OSOU, 2020. Odishan Sanskrit Literature is made available
under a Creative Commons Attribution-ShareAlike 4.0
http://creativecommons.org/licences/by-sa/4.0
Printed by :

## BLOCK - I ODISHAN SANSKRIT LITERATURE

### UNIT - I विष्णुशर्मा एवञ्च विश्वनाथः

१.१ ओडिशायाः कवयः

१.२ विष्णुशर्मा

१.२.१ पञ्चतन्त्रस्य कर्त्ता विष्णुशर्मा, तस्य पाण्डित्यञ्च

१.२.२ पञ्चतन्त्रस्य कथावस्तु

१.३ विश्वनाथः (पञ्चदशशतकम्)

१.३.१ पितामहः नारायण दासः

१.३.२ समयादिनिरूपणम्

१.३.३ विश्वनाथस्य ग्रन्थाः

१.३.४ आदर्शप्रश्नाः

### UNIT - II जीवदेवाचार्यः

२.१ कविडिण्डिमजीवदेवाचार्यः (पञ्चदश-षोडश-शतकम्)

२.१.१ समयः

२.१.२ भक्तिभागवत महाकाव्यम्

२.१.३ भक्तिवैभवनाटकम्

२.१.४ उत्साहवतीरूपकम्

२.१.५ आदर्शप्रश्नाः

### UNIT – III हलधरः मिश्रः

३.१ हलधरः मिश्रः (सप्तदशशतकम्)

३.१.१ वसन्तमहोत्सवः

३.१.२ सङ्गीतकल्पलतिका

३.२ कविचन्द्ररायदिवाकर मिश्रः (पञ्चदश - षोडशशताब्दी)

३.२.१ समयः

३.२.२ कृतयः

३.२.३ आदर्शप्रश्नाः

## UNIT – IV कृष्णानन्दः

४.१ कृष्णानन्दः (चतुर्दशशतकम्)

४.२ समयः

४.३ सहृदयानन्दमहाकाव्यम्

४.४ जयदेवः (द्वादशशताब्दी)

४.५ समयः

४.६ जगन्नाथमन्दिरेण सह सम्पर्कः

४.७ आदर्शप्रश्नाः

४.५ FURTHER READING

## UNIT - I विष्णुशर्मा एवञ्च विश्वनाथः

### १.१ ओडिशायाः कवयः

संस्कृतसाहित्यस्यानुध्यानेन इदं ज्ञायते यत् उत्कलीय कवीनाम् उल्लेखः (संस्कृतसाहित्यं प्रति) न दृश्यते। केवलं गीतगोविन्दकारः जयदेवः, साहित्यदर्पणकारः विश्वनाथकविराजः, अनर्घराघवस्य रचयिता मुरारि मिश्रः प्रभृतयः आलोचिताः। परन्तु एतान् विहाय अपि अनेके कवयः नाट्यकाराः दार्शनिका अपि स्वपाण्डित्यं प्रदर्शितवन्तः। परन्तु तेषामुल्लेखः संस्कृतसाहित्यस्य इतिहासे न दृश्यते, अन्ये केचन पण्डिताः यद्यपि उत्कलभूमौ जन्मम् अभवत्, तथापि तेषां नामानि अन्यराज्यैः सह योजितमासीत्। प्रसिद्धः

उत्कलीयः संस्कृतविद्वान् तथा पञ्चतन्त्रस्य प्रणेता विष्णुशर्मा, नैषधीयचरितस्य रचयिता श्रीहर्षः यद्यपि इतिहासे उल्लिखितौ , तथापि तौ अन्यराज्यस्य इति स्वीकृतौ। विश्वनाथकविराजः यद्यपि उत्कलीयः, तथापि ड. पि.भि काणे महोदयः सन्देहं प्रकटयति। अतः उत्कलप्रदेशस्य गौरवः, ऐतह्यं, साहित्यपरम्परा च न प्रतिष्ठितानि विश्वसाहित्ये। एतत्तु महत् दुर्भाग्यस्य विषयः।

स्वर्गतः केदारनाथमहापात्र महोदयः ‘ A Descriptive Catalogue of Sanskrit Manuscripts Of Orissa' इति नामधेयं पुस्तकं प्रकाशितवान्। अतः गवेषकानां कृते एतत् सुकरं भवति उत्कलप्रदेशस्य साहित्यविषये ज्ञातुम्। अनेके गवेषकाः उत्कलस्य संस्कृतसाहित्यपरम्परां ज्ञातुं चेष्टन्ते। तदुपरि गवेषणापूर्णकार्यं कर्त्तुं चेष्टन्ते। अनेके सुप्रसिद्धसंस्कृतपण्डिताः जन्म लब्धवन्तः। तेषां काव्यशास्त्रप्रणयनेन संस्कृतसाहित्यं ऋद्धिमन्तमभूत्। कलाविलासप्रियोत्कलभूमौ संस्कृतकाव्यानि अनेके रचितवन्तः। भिन्न भिन्न दृष्ट्या तानि काव्यशास्त्राणि अतीव महत्त्वपूर्णानि भवन्ति।

संस्कृतसाहित्यस्य रचना कदा प्रारब्धा इत्यस्मिन् विषये समुचित्तमुत्तरं नैव लभ्यते। परन्तु अथर्ववेदस्य पैपलादशाखा उत्कलप्रदेशात् लब्धा। अतः वैदिककालादारभ्य संस्कृतसाहित्यरचना प्रारब्धा इति अनुमीयते। प्राचीनशिलालेखेष्वपि संस्कृतस्य शब्दसम्भारं तथा भाषां दृष्ट्वा इदं कथयितुं शक्यते यत् उत्कलप्रदेशे संस्कृतचर्चा प्राचीना इति। परन्तु अतिप्राचीनसंस्कृतसाहित्यरचना अधुना नोपलभ्यते।

अतः पञ्चतन्त्रस्य प्रणेता पण्डितविष्णुशर्मा उत्कलप्रदेशस्य प्रथमः संस्कृतसाहित्यकारः इति कथयितुं शक्यते। उत्कलप्रदेशे मुख्यरूपेण प्राकृतभाषायोः प्रचलनमासीत्। उत्कलप्रदेशस्य विभिन्नराजवंशस्य शासनसमये विभिन्नाः प्रशस्तयः दानपत्रं च संस्कृतभाषया लिखितमासीत्। माठरवंशीयराज्ञां समये संस्कृतदानपत्राणि सुन्दरसंस्कृतगद्येन विरचितम्। ख्रीष्टीयषष्ठ-सप्तम शतके संस्कृतदानपत्राणि अलङ्कारपूर्णसंस्कृतपद्येन विरचितमासीत् । उत्कलप्रदेशे संस्कृतकाव्यरचनायाः मौलिकस्त्रोतरूपेण एतानि गृह्यन्ते। माठरवंशीयाः राज्ञां गङ्गवंशीयाः राज्ञां न पृष्ठपोषकतां प्राप्य अनेके कवयः संस्कृतभाषायां काव्यरचनामकुर्वन्।

## १.२ विष्णुशर्मा

कथासाहित्यस्य अन्यतमः विशिष्टः ग्रन्थः भवति पञ्चतन्त्रम्। न केवलं भारतवर्षे अपितु समग्रविश्वे पञ्चतन्त्रं सुप्रसिद्धम्। पञ्चतन्त्रस्य रचयिता उत्कलस्य सुयोग्यसन्तानः पण्डितः विष्णुशर्मा।

पञ्चतन्त्रस्योपरि गवेषणां कृत्वा पाश्चात्यविंद्वासः यथा जर्मान् देशस्य विद्वान् ड.वेनफी (Theoder Benfey), ड. हेर्टेल् ( Dr.Hertel ) च प्रसिद्धौ संजातौ। तेषां मतानुसारं युरोप्- एसिआ-आफ्रिका महोदयानां कथासाहित्यं भारतीयकथासाहित्येन प्रभावितम्। ड.हेर्टेल् महाभागः प्रतिपादयति यत् पञ्चतन्त्रस्य साहित्यिकं रूपं, अस्य भिन्न भिन्न पाठाः विश्वसाहित्योपरि गभीरप्रभावं स्थापयति। अतः पञ्चतन्त्रं न केवलं भारतवर्षस्य , अपि तु विश्वसाहित्यस्य अविच्छेद्यमङ्गम्।

पञ्चतन्त्रस्य मूलमुद्देश्यं भवति सदाचारज्ञानप्रदानम्। ग्रन्थेऽस्मिन् पञ्चतन्त्राणि विद्यन्ते। यथा- मित्रभेदः, मित्रप्राप्तिः, काकोलुकीयम्, अपरीक्षितकारकम्,लब्धप्रणाशश्च। प्रत्येके विभागे पशूनां पक्षीणाञ्च रोचकाः कथाः विद्यन्ते। मौलिकपञ्चतन्त्रे सन्निवेशिताः कथाः अतीव प्राचीनाः। अधुना पञ्चतन्त्रस्य यानि संस्करणानि लभ्यन्ते, तेषु कथाः परिवर्द्धिताः परिवर्त्तिताश्च। पञ्चतन्त्रस्य प्राचीनतमं संस्करणं भवति 'तन्त्राख्यायिका'। सा कश्मिरप्रदेशात् प्रथमं प्रकाशितमासीत्।

पञ्चतन्त्रस्य प्रथमं संस्करणं पह्लवीभाषायां आसीत्। एतत् अधुना नोपलब्धम्। परन्तु एतत् सिरिआभाषायां आरवीभाषायाञ्च अनुदितम्। साम्प्रतं यत् पञ्चतन्त्रमुपलभ्यते तत् तन्त्राख्यायिकायाः रूपान्तरमेव। नेपाली पञ्चतन्त्रं तथा हितोपदेशः दक्षिणपञ्चतन्त्रस्य रूपान्तरमेव।

### १.२.१ पञ्चतन्त्रस्य कर्त्ता विष्णुशर्मा, तस्य पाण्डित्यञ्च

पण्डितः विष्णुशर्मा उच्चब्राह्मणकूले जातोऽभूत्। न केवलं सः, अपितु तस्य पूर्वजाः श्रुति-स्मृति-वेद-वेदाङ्ग-न्याय-उपनिषद्-योग-प्रभृतिषु विषयेषु पण्डिताः आसन्। लौकिकसंस्कृत- साहित्यस्य अङ्गविशिष्टत्वात् पाणिनिव्याकरणेन पूर्णरूपेण प्रभावितः। पुनश्च विष्णुशर्मा नाम्ना विख्यात-पण्डित विषये पृथ्विमहाराजस्य ताण्डिवाडा शिलालेखे उल्लिखितम्।

“ यथा श्रुतिस्मृतिपारगस्य यथावदनुष्ठिताग्निष्टोमादि क्रियापूतात्मनो विष्णुशर्मणः पुत्राय (पौत्राय) असकृदिज्याप्रयोगेषु (प) – रायमाण-द्रविण सूचितत्त्वं सेनस्य समृद्धे? सहस्त्रविद्याध्ययनप्रवचनव्याख्यानशालिनः पृथिवीशर्मणः पुत्राय वेदवेदाङ्गन्यायोपनिषद् योगाववोधनिर्मलीकृतवुद्धये विविधाध्वरावभृथाम्भः पवित्रीकृतविग्रहाय देवपितृमनुष्यसमर्चन- समानीयरात्रिन् दिवाय कोण्डमचिग्रामनिवासिने त्रिसहस्त्रविद्याय विंशतिव्याख्यानाय कामकायनसगोत्राय छन्दोगस ब्रह्मचारिणे भवशर्मणे...”

उपरोक्तशिलालेखे विष्णुशर्मणः उल्लेखः विद्यते यः पञ्चतन्त्रस्य कर्त्ता। सोऽपि वेद-स्मृति-न्याय-दर्शनोपनिषद्योगप्रभृतिशास्त्रेषु पारङ्गमः आसीत्। तस्य पृष्ठपोषकभावेन अमरुशक्ति नाम्ना पृथ्विमहाराजा कलिङ्गस्य दाक्षिणात्ये राजाऽऽसीत्। तस्मिन् समये एव विष्णुशर्मा कलिङ्गदेशस्य अधिवासी आसीत्।

प्रख्यातः ऐतिहासिकः ड. शरतचन्द्रः वेहेरामहोदयेन विष्णुशर्मा उत्कलस्य प्रतिष्ठितः विद्वान् इति प्रतिपादितम्। तस्य मतेन-

Kalinga was very probably the homeland of Vishnu Sharma, because Anantaakti (Son of Amarawakti) of the Kathamukha of Panchatantra appears to be no other than Anantawakti Verma of Mathara family of Kalinga.

## १.२.२ पञ्चतन्त्रस्य कथावस्तु

नीतिसदाचारशिक्षाप्रदानाय पञ्चतन्त्रं विष्णुशर्मणा विरचितम्। ग्रन्थेऽस्मिन् पञ्चतन्त्राणि सन्ति। प्रथमं तावत् मित्रभेदः। अत्र मित्रयोर्मध्ये कथं भेदः क्रियते तद् वर्ण्यते। पिङ्गलकः नाम्ना सिंहः संजीवक नाम्ना वलिवर्दः च मित्रे आस्ताम्। शृगालद्वयेन कथं स्वबुद्ध्या तयोर्मध्ये भेदं कारयतः, तस्मिन् विषये सुन्दरगल्पमाध्यमेन वर्ण्यते। गल्प पठनेन श्रवणेन वा कल्पना इव न प्रतीयते। अन्ते नीतिशिक्षा प्रदीयते।

द्वितीयभागे मित्रसंप्राप्तिः । भागेऽस्मिन् चित्रग्रीवः (कपोतराजः), हिरण्यकः (मूषिकः), लघुपतनकः (काकः), मन्थरः (कच्छपः) च मित्राणि आसन्। ते परस्परं प्रति मित्रताहेतोः बद्धाः आसन्। विभिन्नकष्टसमयेष्वपि परस्परं प्रति साहार्यं कृत्वा विपद्मुक्तोऽभवत्। भागोऽयम् अतीव शिक्षणीयः सरलप्राञ्जलभाषया वर्णितमासीत्।

तृतीयभागे सन्धिविग्रहः अर्थात् शान्तिः अथवा युद्धः। अत्र युद्धस्य शान्तिस्थापनार्थं च भिन्न- भिन्नोपायाः उदाहरणेन सह दीयते। शत्रुपक्षे विभेदं कारयित्वा कथं विजयः प्राप्तः काकैः, तत् वर्ण्यते।

चतुर्थभागे लब्धप्रणाशः, यत् लब्धं तस्य नाशः भवति। मकर-मर्कटयोः कथां श्रावयित्वा लेखकः वक्तुमिच्छति यत् यदि विपदः भयस्य वा कारणं दृश्यते अनुमीयते वा तर्हि तेन सह मित्रता न कर्त्तव्या। उपस्थिते तु विपदि धैर्यशीलः भूत्वा तस्य निराकरणं कुर्यात्। अर्थात् यदि कथायामस्यां मर्कटः यः मकरस्योपरि उपविष्टः आसीत्, पुनः नदीमध्येऽपि आसीत्, तदा मकरः स्वेच्छां प्रकटितवान्। तत् श्रुत्वा यदि मर्कटः भयभीतः सन् धैर्यं त्यजति तर्हि तस्य प्राणहानिः। परन्तु लेखकः तादृशं न कृतवान्। समाजं प्रति शिक्षाप्रदानाय उत्तमरूपेण अस्य समाधानमकरोत्। भयशून्यः मर्कटः अवदत् यत्, वृक्षकोटरे एव तस्य सुमिष्टं हृदयं वर्त्तते। यदि खादितुमिच्छसि, तर्हि कूलं प्रति गमनीयम्। मकरः तं मर्कटं नदीतीरमानीतवान्। सहसा एव मर्कटः लम्फप्रदानेन वृक्षमारुह्य स्वजीवनरक्षां कृतवान्।

पञ्चमभागः अपरीक्षितकारकमिति। अपरीक्ष्य न विचार्य एव किमपि कार्यं न करणीयमिति अस्य भागस्य नीतिशिक्षा। नकुलः सर्पं मारितवान् शिशुपुत्रं च रक्षितवान्। परन्तु रक्तमुखं नकुलं दृष्ट्वा ब्राह्मणी किमपि चिन्तां न कृत्वा तमेव मारितवती। गृहे यदा मृतं सर्पं दृष्टवती तदा विलपितवती। विश्वस्तं, शिशुपुत्रस्य रक्षाकारिणं नकुलं सा हतवती। अतः “सहसा विदधीत न क्रिया” इत्यपि उक्तम्।

विष्णुशर्मा स्मृतिशास्त्रान् विचार्य एव ग्रन्थमिमं विरचितवान्। चाणक्यस्य अर्थशास्त्रेण मनुस्मृतिग्रन्थद्वारापि सः प्रभावितः। अस्य भाषा अतीव सरला सुमधुरा च। राजनीति- लोकनीतिविषये सः सम्पूर्णरूपेण अभिज्ञः। तस्य शिक्षादानकौशलेन उन्मार्गगामिनः राजपुत्राः शिष्टाः शान्ताः सर्वशास्त्रपारङ्गमाः सन्मार्गगामिनश्चाभवन्। राजानं प्रति तस्य दृढोक्तिः तस्यात्मप्रत्ययं द्योतयति। शिक्षादानविषये तस्य ज्ञानं अभिज्ञता च बहु आसीत्। समाजस्य कुमार्गगामियुवानः कथं सन्मार्गगामिनः भविष्यन्ति, तत्कृते तस्य पशुपक्षीगल्पमाध्यमेन नीतिशिक्षाप्रदानं तस्य मूललक्ष्यमासीत्। अनेन प्रकारेण सोऽपि सफलः अभवत्।

पञ्चतन्त्रमद्यापि समाजं प्रति आवश्यकम्। नीतिशिक्षामाध्यमेन अद्यतनयुवानः सन्मार्गे जीवनयापनं करिष्यन्ति। समाजं प्रति पञ्चतन्त्रस्य मूल्यं सर्वाधिकमस्ति। न केवलं युवानः अपितु विद्यालयगामिछात्राणां कृतेऽपि एतत् बहु आवश्यकम्।

## १.३ विश्वनाथः (पञ्चदशशतकम्)

संस्कृतकाव्यशास्त्रस्य सुदीर्घा प्रौढा च परम्परा प्रचलिता आसीत्। महाकविः विश्वनाथकविराजः साहित्यदर्पणं विरच्य प्रसिद्धो जातः। तत्रापि अनेकानां कृतीनामपि नामानि उपलभ्यन्ते। साहित्यदर्पणं स्ववैशिष्ट्यहेतोः प्रसिद्धिमवाप, लोकप्रियञ्चाभूत्। ग्रन्थेऽस्मिन् काव्यशास्त्रस्य नाट्यशास्त्रस्य सर्वाणि तत्त्वानि विस्तृतभावेन वर्णितानि। सः उत्कलप्रदेशे जन्मग्रहणमकरोत्। कपिञ्जलकुलस्य विद्वांसः तस्य पूर्वजाः आसन्। तेषां सम्बन्धः कलिङ्गदेशस्य नरपतिना साकं वंशपरम्परानुयायी आसीत्। विश्वनाथकविराजस्य पुत्रः अनन्तदासः साहित्यदर्पणस्य लोचननाम्ना टीकां विरचितवान्। तत्र स्वपितुः विषये उल्लिखितवान् च।

**“आसीत्कपिञ्जलकुलक्षीराकूपारचन्द्रमा ।**
**त्रिकलिङ्गाधिपधराधामधी सचिवकृती ।।”**
**“अशेषभाषारमणीभुजङ्गः साहित्यविद्यार्णवकर्णधारः।**
**ध्वन्यध्वनिप्रौढधियां पुरोगः श्रीविश्वनाथः कविचक्रवर्त्तीः।।” इति।**

कविराजविश्वनाथस्य प्रपितामहः नारायणदासः । तस्य पुत्रद्वयमास्ताम् उल्लासदासः चण्डीदासश्च। उल्लासदासस्य पुत्रः चन्द्रशेखरः, चन्द्रशेखरस्य पुत्रः विश्वनाथः, चण्डीदासस्य पुत्रः कृष्णानन्दः विख्यातः कविरपि आसीत्। सः ‘सहृदयानन्द’ नामकं महाकाव्यमेकं विरचितवान्।

विश्वनाथकविराजोऽपि स्वपितामहविषये साहित्यदर्पणे उल्लिखति-

“चमत्कारश्चितविस्ताररूपो विस्मयापरपर्यायः। तत् प्राणत्वं चास्मद् वृद्ध प्रपितामह-सहृदयगोष्ठीगरिष्ठ - कविपण्डितमुख्य - श्रीनारायणदास पादैरुक्तम्।” साहित्यदर्पणस्य दशमपरिच्छेदे स्वपितुः नामोल्लेखं करोति।

**“श्री चन्द्रशेखरमहाकवि चन्द्रसुनु-**
**श्रीविश्वनाथ कविराजकृतं प्रबन्धम्।**
**साहित्यदर्पणम् अमुं सुधीयो विलोक्य**
**साहित्यतत्त्वमखिलं सुखमेव वित्तः।।” (साहित्यदर्पणम् x - 99 )**

विश्वनाथस्य पिता श्रीचन्द्रशेखरः अपि महान् कविः। तेन ‘पुष्पमाला’ ‘भाषार्णवम्’ इति रूपकद्वयं विरचितवान्। तस्य परिवारस्य अन्येपि सदस्याः विंद्वासः आसन्। विश्वनाथस्य पिता चन्द्रशेखरोऽपि महाकविः आसीत्। सोऽपि सन्धिविग्रहिकमहापात्रः भानुदेवतृतीयस्य राज्ञः आसीत्, यस्य समयः १३५३-१३७८ ख्रीष्टियः। विश्वनाथः स्वपूर्वजानां विषये एकस्मिन् श्लोके कथयति-

**श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-**
**श्रीविश्वनाथ कविराजकृतं प्रबन्धम्।**
**साहित्यदर्पणममु सुधियो विलोक्य**
**साहित्यतत्त्वमखिलं सुखमेव वित्त।। साहित्यदर्पणम् – x /९९**

यथा ममतातपादानां महापात्र-चतुर्दशभाषाविलासिनी-भुजङ्गमहाकवीश्वर-श्रीचन्द्रशेखर-सन्धिविग्रहिकाणाम्।

### १.३.१ पितामहः नारायण दासः

विश्वनाथकविराजस्य पितामहः कविराजः नारायण दासः, तस्यानुजः महामहोपाध्यायः चण्डीदासः। सः काव्यप्रकाशोपरि काव्यप्रकाशदीपिकानाम्निटीकां विरचितवान्। नारायणदासोपरि सः उल्लिखितवान् “चमत्कारश्चितविस्ताररूपो विस्मयापरपर्यायः, तत् प्राणत्वं चास्मद् बृद्ध प्रपितामह-सहृदयगोष्ठीगरिष्ठ-कविपण्डितमुख्यश्रीनारायणदासपादैरुक्तम्।। तदाह धर्मदत्तः स्वग्रन्थे रसेसारः ... साहित्यदर्पणम् - III , वृत्ति कारिका २-३)
अन्यमेकं नारयणदासस्य विषये...

**“यदाहु: श्रीकलिङ्गभूमण्डलाखण्डल महाराजाधिराज - नरसिंहदेवसभायां धर्मदत्तं स्थगयन्त: सकलसहृदयगोष्ठीगरिष्ठ – अस्मत्- पितामह श्रीमन्नारयणदासपादा:।”**

**–काव्यप्रकाशदर्पण**

## १.३.२ समयादिनिरूपणम्

यद्यपि कविपुङ्गवस्य विश्वनाथस्य समयादिनिरूपणे किमपि स्फुटतरं प्रमाणं नोपलभ्यते, तथापि समुपलब्धानि कानिचन प्रमाणानि आधारीकृत्य तस्य निरूपणे चेष्टामहे। साहित्यदर्पणस्य चतुर्थे परिच्छेदे कविरयं यवनाधिपति आलावद्दिनखिलिजीनामकं-

**सन्धौ सर्वस्वहरणं निग्रहे।**
**आलावदनि् नृपतौ न सन्धिर्न च निग्रह: ।।**

इति श्लोकमाध्यमेन स्मरति। आलावदीनखिलजी नामकस्य यवानाधिपस्य शासनकाल: १२९६-१३१६ ख्रीष्टिय:) यावदासीत्। एतेन श्लोकेन प्रतीयते यत् विश्वनाथ: आलावदीनखिलिजस्य अनन्तरमेव आसीत्।

साहित्यदर्पणस्य एका १३८४ ख्रीष्टाब्दे लिखितां हस्तलिखितां पाण्डुलिपिं समुपलब्धा। अनया विश्वनाथस्य काल: १३८४ ख्रीष्टाब्दात् प्रागेव निश्चितं भवति। महाकवि: विश्वनाथ: नरसिंहविजयाख्यं काव्यमेकं लिखितवान्। तत्र आलावदिनखिलजि पराजयितारं कलिङ्गराजभूपतिं नरसिंहरावस्य स्तुतिं करोति-

**आहवे जगदुदण्डराजमण्डल राहवे।**
**श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव वाहवे ।।**

अनेन आभाति यत् महाकवि: कश्चन कलिङ्ग-देशप्रशासितु: नरसिंहरावभूपते: राज्ये सन्धिविग्रहिक: आसीत्। महाकविविश्वनाथप्रणीतया चन्द्रकलानाटिकया आभाति यदयं

कविः कस्यचन भानुदेवनृपतेः अपि सन्धिविग्रहिकः आसीदिति। एभिः सर्वैः प्रमाणैः इदं निर्णितं भवति यत् अस्य महाकवेः त्रयोदशशताब्द्याः उत्तरार्द्धमारभ्य चतुर्दश शताब्द्यां पूर्वार्द्धे भवितुमर्हति।

अयं महाकविः केवलं संस्कृतभाषायाः एव विद्वान् नासीदपितु अष्टादशभाषाविलासिनीभुजङ्गः स्वस्मै लिखित्वा स्वीयाम् अष्टादशसु भाषासु निपुणतां सूचयति। साहित्यदर्पणे विश्वनाथः उदाहरणरूपेण एतादृशं पद्यमुद्धृतवान् स्वनिर्मितं यस्य बहुषु भाषासु समाने एव अर्थो भवति। तच्च पद्यरत्नमिदं भवति –

**मञ्जुल मणिमञ्जीरे कलगम्भीरे विलास सरसस्तीरे।**

**विरसासिकेलिकीरेकिमालि! धीरे च गन्धसमीरे।।**

पद्यमिदं संस्कृत-प्राकृत-शौरसेनी-प्राच्य-अवन्ती नागराप्रभंशेषु समानरूपमेव भवति।

### १.३.३ विश्वनाथस्य ग्रन्थाः

विश्वनाथस्य नवसंख्यकाः ग्रन्थाः तस्य प्रतिभायाः परिचयं प्रयच्छति। यथा-

१. राघवविलासः (महाकाव्यम्)
२. चन्द्रकला (नाटिका)
३. प्रभावती परिणयम् (नाटकम्)
४. कुवलयाश्वचरितम्।
५. प्रशस्तिरत्नावली (षोडशभाषासु निर्मितं करभकम्)
६. नरसिंहविजयः (खण्डकाव्यम्)
७. कंसवधम् (काव्यम्)
८. साहित्यदर्पणम्
९. काव्यप्रकाशदर्पणः (काव्यप्रकाशस्य व्याख्या)

विश्वनाथेन यद्यपि नवसंख्यकाः ग्रन्थान् विरचितवान्, तथापि साहित्यदर्पणरचनेन प्रख्यातिं लब्धबान्। तारकागणेषु चन्द्रः यथा विभाति तद्वत् साहित्यदर्पणग्रन्थः काव्येऽस्मिन् दशसंख्यकाः परिच्छेदाः सन्ति। प्रथमपरिच्छेदे काव्यप्रयोजनं लिखित्वा काव्यप्रकाशकृतं काव्यलक्षणं निर्दिशति। द्वितीयपरिच्छेदे वाक्यं पदं च निरूप्य शब्दशक्तीनां विशदं विवेचनं कृतवान्। तृतीये रसस्य व्याख्यां कृत्वा नायकनायिकादीनामपि विवेचनमकार्षीत्।

नायकनायिकानां वर्णनं काव्यप्रकाशापेक्षया नवीनो विषयो वर्त्तते। विश्वनाथः चतुर्थ परिच्छेदे गुणीभूतव्यङ्ग्यकाव्यं विशदीकृतवान्। पञ्चमपरिच्छेदे व्यञ्जना-विरोधीनीवादिनो निराचष्टे । षष्ठपरिच्छेदे दृश्यश्रव्यकाव्यनिरूपणं तथा नाट्यतत्त्वनिरूपणं विस्तृतभावेन दीयते। षष्ठे काव्यभेदानां वर्णनं काव्यप्रकाशपेक्षा सर्वथा नवीनो विषयो वर्त्तते। सप्तमे दोषाणां विचारः कृतः। अष्टमे परिच्छेदे प्राचीनानां खण्डनपुरः सरं मम्मटोक्तदीश। गुणत्रयस्य स्थापनां करोति स्म। नवमे परिच्छेदे रीतिनां विवेचनमकार्षीत्। दशमे परिच्छेदे शब्दार्थलंकाराणां विशदं विवेचनमकरोत् विश्वनाथः।

ग्रन्थेऽस्मिन् कारिकावृत्ति उदाहरणानि दृश्यन्ते। संस्कृतवाङ्मये अयं सर्वोत्तमग्रन्थः भवति, यत्र नाट्यतत्त्वस्य तथा काव्यस्य विस्तृतभावेनालोचनं क्रियते। काव्यप्रकाशं पाठकानां कृते दुरुहम्, परन्तु साहित्यदर्पणं सुवोध्यं भवति। अतः पाठकानां काव्यप्रेमिजनानां कृते अधिकं लोकप्रियः भवति अयं ग्रन्थः।

अतः साहित्यदर्पणग्रन्थविषये स्वयं ग्रन्थकारः कथयति–

**साहित्य दर्पणममु सुधियो विलोक्य।**

**साहित्य तत्त्वमखिलं सुखमेव वित्त।।**

## १.३.४ आदर्श प्रश्नाः

१. पञ्चतन्त्रस्य वैशिष्ट्यं प्रतिपादयत?

२. विश्वनाथस्य कालः कृतीं च आलोचयत?

३. अधस्तनानां संक्षिप्तविवरणीं प्रदेया-

(क) विष्णुशर्मा

(ख) साहित्यदर्पणः

## २.१ कविडिण्डिमजीवदेवाचार्य: (पञ्चदश-षोडश-शतकम्)

कविडिण्डिमजीवदेवाचार्यः गजपतिप्रतापरुद्रदेवस्य गुरुः मन्त्री चापि आसीत्। प्रसिद्धः सूर्यवंशीराजाप्रतापरुद्रस्य समयः ख्रिष्टीय १४९७-१५४०। जीवदेवाचार्यः महान् कविः आसीत्। भक्तिभागवतमहाकाव्यम् उत्साहवतीरूपकञ्च विरचितम्।

प्रख्यातोत्कलप्रदेशे ब्राह्मणकूले वत्सगोत्रसम्पन्न; जीवदेवाचार्यः जातोऽभुत्। मध्य ओहिशाभागे तस्य पूर्वजाः विशिष्टाः ख्यातिसम्पन्नाः विंद्वासः आसन्निति कविः स्वयं स्वग्रन्थे उल्लिखितवान्। तस्य वंशजाः याजिपुरस्य (अधुना याजपुरः) अवसन्, यदा भोजवंशीयाः राजानः उत्कलप्रदेशमशासन्। याजपुरस्य अधिष्ठात्री देवी विरजा शक्तिस्वरूपिणी प्रसिद्धा। ते सर्वे तां पूजयित्वा तस्याः कृपया तन्त्रविद्याक्षेत्रे, वैदिकयज्ञपरम्परायाञ्च पारङ्गमाः आसन्। मृत्युञ्जय आचार्यनामा कश्चन तस्य वंशजः भोजराजसभायां कुलगुरुः आसीत्। अन्यः कश्चित् भवदेवः केशरीवंशस्य गुरुः अपि आसीत्। सः 'तन्त्रार्णवं' विरचितवान्। गौरीगुरुः अपि गङ्गवंशस्य प्रतिष्ठतुः चोडगङ्गदेवस्य राजसभायां गुरुः आसीत्।

जीवदेवाचार्यस्य पिता त्रिलोचनाचार्यः बहुशास्त्रेषु प्रवीणः आसीत्। अतः गजपतिपुरुषोत्तमदेवस्य गुरुरूपेण सः राज्ञा सम्मानितोऽभूत्। जीवदेवाचार्योऽपि स्ववंशपरम्परानुसारं विशिष्टः विद्वान्, बहुशास्त्रेषु पण्डितः सन् राजगुरुपदमलंकृतवान्। अनन्तरमपि परमाचार्यपदेन, महामहोपाध्यायपदेन वाहिनीपतिपदेन च विभूषितोऽभूत्। महाराजेन प्रतापरुद्रदेवेन सः 'कविडिण्डिमः' इति उपाधिना सम्मानितोऽभवत्। उत्साहवतीरूपके इदं वर्णितमासीत्।

**अष्टौहाटकचामराणि कनकच्छत्रं डमड्डिण्डिमं**

**यो लब्ध: प्रथितप्रतापविभवश्रीरुद्रदेवश्वरात्।**

**श्री जीव: कविडिण्डिमो नृपगुरुर्नानाकला चञ्चुर-**

**स्तस्योत्साहवतीति रूपकमिदं प्रस्तुयतां नर्त्तितुम्।। (उत्साहवती – V.5)**

काव्यरचनाक्षेत्रे तस्य पाण्डित्यं प्रतिभा च असाधारणा असामान्या च। एतस्मिन् विषये भक्तिभागवतमहाकाव्ये इदमुल्लिखितम्-

**एक: परं रचयितुं प्रहरात् प्रबन्ध-**

**मेक: परं षडपि खण्डयितुं मतानि।**

**शक्तो मुकुन्दपदपङ्कज चिन्तनेन**

**श्रीजीवदेव कविडिण्डिम-पण्डितेन्द्र:।।**

तस्य प्रतिभा एतादृशी आसीत् यत् स एकस्मिन् प्रहरे काव्यमेकं रचयितुं सक्षमः, भगवतः मुकुन्दस्य पादपद्मे स्वमनः निधाय विस्मयजनकं कार्यमपि कर्त्तुं समर्थः आसीत्। अस्मात् ज्ञायते यत् सः नैष्ठिकः वैष्णवः आसीत्। ग्रन्थस्येकस्य पुष्पिकायां तस्य विविधप्रतिभाविषये उल्लिखितम्।

“इति श्रीमत्कविराज-राजगुरुत्रिलोचनाचार्यतनय श्रीरत्नावतीनन्दन श्रीमन्महामहोपाध्याय श्रीमद्भगवद्वासुदेव - भक्ति-प्रस्थान-प्रणयन-परमाचार्य-कविडिण्डिम-वाहिनीपति राजगुरु-विरचितमुत्साहवती नाम रूपकं सम्पूर्णम्। ”

## २.१.१ समयः

जीवदेवाचार्यः यदा पञ्चत्रिंशत् वयस्कः आसीत्, तदा सः भेङ्कटादिस्थाने प्रतापरुद्रदेवस्य राज्ञः सप्तदशअङ्के माघमासे भक्तिभागवतमहाकाव्यं विरचितवान्। तदा राजा प्रतापरुद्रदेवः कर्णाटकविजयार्थं गतवान्।

**“श्रीरुद्रदेव नृपतावथ वेङ्कटाद्रौ**

**कर्णाटदेशविजयेन वसत्युदारे।।**

**तेनास्य शीघ्रकविना जगदीश्वरस्य**

**काव्यं निवद्धमिदमुज्ज्वलभक्तिसिद्धम्।।**

**अङ्केऽस्य सप्तदशके नृयते: स पञ्चत्रिंशाब्दचुम्बितत्त्वया: कविडिण्डिमोऽयम्।**
**गोदावरी परिसरे निवसन्नकार्षीन् मासेन तत्र मकरेण महाप्रबन्धम्।।**

राज्ञः प्रतापरुद्रदेवस्य चतुर्दशाङ्कः ख्रीष्टीय १५१०तमे वर्षे भवति। अतः कविः डिण्डिमाचार्यः नूनं ख्रीष्टीय १४७५तमे वर्षे जातोऽभूत्।

## २.१.२ भक्तिभागवत महाकाव्यम्

भक्तिभागवतमहाकाव्ये द्वात्रिंशत् सर्गाः विद्यन्ते। भगवतः कृष्णस्य जन्म, तस्य लीला, परवर्त्तीजीवनविषयं चोल्लिखितम्।। तस्य काव्यस्यारम्भे –
ॐ तत्सत् श्रीगणेशाय नमः।

**श्री शक्तिचेतोभववीजभूतां तडिन्निभां त्रिपुटां तां भजामः**
**यतोऽभिजाता कवितालता सा पुन्नागमाश्रित्य फलानि सूते।**
**नमोऽस्तु तस्मै श्रुतिसारसाक्षि शिखासरोजाय विकश्वराय**
**यस्याखिलः सौरभसम्भ्रमेण निराकृतो विभ्रमगन्धभेदः।।**

सर्वेषां सर्गानां नामानि यथा-

| | | |
|---|---|---|
| प्रथमसर्गः | - | न नामितः |
| द्वितीयसर्गः | - | देवकीगर्भधारणम् |
| तृतीयसर्गः | - | कृष्णावतारः |
| चतुर्थसर्गः | - | वृन्दावनपरिवेशः |
| पञ्चमसर्गः | - | कालीयदलनम् |
| षष्ठसर्गः | - | गोविन्दाभिषेकः |
| सप्तमसर्गः | - | प्रत्यङ्गवर्णनम् |
| अष्टमसर्गः | - | वस्त्रहरणम् |
| नवमसर्गः | - | रासारम्भः |
| दशमसर्गः | - | रासोल्लासः |
| एकादशसर्गः | - | मथुराप्रवेशः |

| | | |
|---|---|---|
| द्वादशसर्गः | - | कंसविध्वंसन |
| त्रयोदशसर्गः | - | बल्लभी सन्देशः |
| चतुर्दशसर्ग | - | जरासन्ध-बन्धनम् |
| पञ्चदशसर्ग | - | कालयवनसंयवनम् |
| षोडशसर्ग | - | कुण्डिनप्रयाणम् |
| सप्तदशसर्ग | - | रुक्मिणीहरणम् |
| अष्टादशसर्गः | - | सत्यभामापरिणय |
| उनविंशसर्ग | - | लक्ष्यभेदः |
| विंशसर्ग | - | पारिजातहरणम् |
| एकविंश सर्ग | - | उषापरिणयः |
| द्वाविंशः सर्ग | - | इन्द्रप्रस्थप्रवेशः |
| त्रयविंश सर्गः | - | शिशुपालवधम् |
| चतुर्विंश सर्ग | - | मूर्त्तिदर्शनम् |
| पञ्चविंश सर्गः | - | द्वारकावर्णनम् |
| षडविंश सर्गः | - | रैवतकवर्णनम् |
| सप्तविंश सर्गः | - | ऋतुवर्णना |
| अष्टविंश सर्गः | - | वसन्तवर्णना |
| एकोनत्रिंशत् | - | जलकेलिकुतुहलः |
| त्रिंशत् | - | निस्तन्द्र चन्द्रोदय |
| एकत्रिंशत् | - | संभोगवर्णना |
| द्वात्रिंशत् | - | दिनकृत्यविनोदवर्णना |

महाकाव्यस्यास्य भाषा सरला, गीतिमयी च। काव्यपठनेन कवेः बहुशास्त्रपाण्डित्यं ज्ञायते।

## २.१.३ भक्तिवैभवनाटकम्

भक्तिवैभवनाटकं भिन्नप्रकारकं नाटकं यत्र षड्दर्शनानि जीवन्तरूपेण चित्रितानि। प्रत्येकं दर्शनमात्मनः वैशिष्ट्यं प्राथम्यं च सूचयति। अन्ते कृष्णभक्तिः सर्वान् पराजित्य विजयलाभमकरोत्। नाटकस्यास्य मूलतत्त्वं भवति-

**शैवं पाशुपतं तथागतमतं निमौलिकं कौलिकम्।**

**सर्वं न्यायशतै निरस्य निहितं कृष्णस्य शुद्धमतम्।।**

नाटकस्यारम्भः भगवतः शिवस्य प्रार्थनया भवति, यत्र नाटकस्य निर्विघ्नपरिसमाप्त्यर्थम् आशीर्वादं कामयते कविः। सूत्रधारोऽपि भगवन्तं जगन्नाथं स्तौति। प्रथममेव दोलयात्रायां नाटकमिदं जगन्नाथमन्दिरस्य परिसरे अभिनीत आसीत्। नाटकमिदं भक्तिभागवतमहाकाव्यानन्तरमेव रचितम्। 'महामहोपाध्यायः' 'वाहिनीपति' प्रभृतयः उपाधयः अस्य नाटकस्य पुष्पिकायां दृश्यते। नाटकेऽस्मिन् नव अध्यायाः सन्ति। विद्याविलोकनं (प्रथमाङ्कः), पषाण्डमण्डलं (चतुर्थाङ्कः), सुधासिद्धान्तोदय (पञ्चमसर्गः), कामदेव (षष्ठाङ्कः), कामविजयः (सप्तमाङ्कः) च।

## २.१.४ उत्साहवतीरूपकम्

इदं रूपकस्य विभागं विथिनामा क्षुद्रं नाटकम्। लिङ्गराजमिश्रः महाभागेन प्रथमतया उत्कलभाषायां प्रकाशितामासिकपत्रिकायां "नैवभारते"। एकाङ्कविशिष्टे नाटकेऽस्मिन् पारम्परिकसंस्कृतछन्दसा सर्वे श्लोकाः विरचिताः। प्रायतः दोलोत्सवे जगन्नाथमन्दिरं निकषा मणिमण्डपे प्रथमे अभिनीतमासीत्। जैमिनीयमहाभारतोपरि नाटकमिदं विरचितम्। युधिष्ठिरस्य यज्ञाश्वस्य रक्षणे अर्ज्जुनः नियुक्तः। यज्ञाश्वः गमनकाले उत्साहवतीनाम्ना कन्यया गृहीतः। अर्ज्जुनः एतदर्थं युद्धमारब्धवान्। श्रीकृष्णः नारदश्च तत्रागत्य अर्ज्जुनं पराजयात् रक्षितवान्। अन्ते अर्ज्जुनेन सह उत्साहवत्याः विवाहोऽभवत्। नाटकमिदं भक्तिभागवतमहाकाव्यानन्तरमेव रचितम्।

## २.१.५ आदर्श प्रश्नाः

१. कविडिण्डिमजीवदेवाचार्यस्य कृतीनां विषये समालोचयत।

२. कविडिण्डिमजीवदेवाचार्यस्य कालः निरूपणं कुरुत।

**३. अधस्तनानां संक्षिप्तविवरणीं प्रदेया-**

(क) भक्तिभागवतमहाकाव्यम्

(ख) भक्तिवैभवनाटकम्

## ३.१ हलधरः मिश्रः (सप्तदशशतकम्)

वसन्तोत्सवमहाकाव्यस्य सङ्गीतकल्पलतायाः रचयिता हलधरमिश्रः। प्रख्यातसङ्गीतरूपेण ख्यातः आसीत्। हलधरमिश्रस्य जन्म प्रख्यात धर्मशास्त्रविरचकः शम्भुकर मिश्रस्य गृहेऽभूत्। तस्य पितुः नाम दिनकरः माता पद्मावती चास्ताम्। तस्य पुत्रः कपिलेश्वरोऽपि प्रख्यातः संस्कृतविद्वान् आसीत्।

**माता यस्य पवित्रकीर्त्तिरमला पद्मावती यत्पिता**
**सारासारविचारविद्दिनकरो नीरोद्भवाक्षः क्षमी।**
**जातः शम्भुकरे कुलेतिविमले सोऽहं पुरारातये**
**काव्यं भव्यमिदं मुदाहलधरो धीरोददे तन्मुदे।। (वसन्तोत्सवकहाकाव्य, २२/५४)**

सङ्गीतकल्पलता अथवा सङ्गीतकल्पलतिका यद्यपि स्वतन्त्रं काव्यं तथापि वसन्तोत्सवमहाकाव्यस्य तृतीये सर्गे इदमन्तर्भुक्तम्। पुष्पिकायामिदं लिखितं यत्- इति श्री हलधर मिश्रकृते वसन्तोत्सवे महाकाव्ये सङ्गीतनिरूपणं नामो तृतीयसर्गः। सङ्गीतस्य विभिन्नविभागविषये अत्र वर्णितम्। सङ्गीतकल्पलतिका - वसन्तमहोत्सवकाव्यस्य तृतीयसर्गयोः मध्ये प्रायतः सर्वाः समानाः। परन्तु केवलं सङ्गीतकल्पलतिका काव्ये प्रबन्धाः सङ्गीताश्च लभ्यन्ते। परन्तु वसन्तमहोत्सवमहाकाव्ये तानि न लभ्यन्ते।

"हलधरसंहिता" नाम्ना स्मृतिग्रन्थमपि तेन विरचितम्। राज्ञः नरसिंहदेवस्य प्रीत्यर्थं तेन 'हरिहरप्रकाशप्रबन्ध' नामकं ग्रन्थं विरचितवान्।

वसन्तसमये जगन्नाथस्य रथयात्रारम्भः गजपतिनरसिंहदेवेन (१६२३-१६४७) आरब्धम्। अधुना आषाढमासे तत् प्रचलति। सोऽपि विभिन्नसंस्कृतकवीनां नामानि उल्लिखति। यथा वाणनगरहरिचन्दनः, गङ्गाधरदासः, अनङ्गभीमः, मधुपरनरेन्द्रः, गजपतिमुकुन्दः, गजपतिरायचन्द्रः च सर्वे सप्तदशशतकात् प्रागेव आसन्।

## ३.१.१ वसन्तमहोत्सवः

महाकाव्यस्य प्रारम्भे भगवतः शिवस्य विष्णोश्च प्रार्थनां कृत्वा राज्ञः रामचन्द्रदेवस्य, तस्य पुत्रस्य पुरुषोत्तमदेवस्य, तस्य उत्तराधिकारिणः नरसिंहदेवस्य स्तुति प्रस्तौति। नरसिंहदेवस्य पुरीं प्रति यात्रा अस्य काव्यस्य विषयवस्तु। प्रथमसर्गः - श्रीपुरुषोत्तमप्रवेशः, द्वितीय सर्गः - राजनीतिवर्णनम्, तृतीयसर्गः - सङ्गीतनिरूपणम्, चतुर्थसर्ग - स्वप्नदर्शनम्, पञ्चमसर्गः - यात्रानिर्णयः, षष्ठसर्गः - हरगौरिकः पुरीप्रवेशः, सप्तम सर्गः - पुरीवर्णनम्, अष्टमसर्गः - देवालयप्रवेशः, नवमसर्गः - शस्त्रलक्षणम्, दशमसर्गः - अन्तः पुरप्रवेशः, एकादशसर्गः - रथघटनम्, द्वादशसर्गः - यात्रिकप्रस्थानम्, त्रयोदशसर्गः - षडऋतुवर्णनम्, चतुर्दश सर्गः- वनविहारः, पञ्चदशसर्गः - जलविहारः, षोडशसर्गः - चन्द्रवर्णनम्, सप्तदशसर्गः - दूतीप्रस्थानम्, अष्टादशसर्गः - सुरतवर्णनम्, ऊनविंशसर्गः - प्रभातवर्णनम्, विंश सर्गः - गुण्डिचामण्डपप्रवेशः, एकविंशसर्गः- होरावर्णनम्, द्वाविंशसर्गः - परिवर्त्तनगुण्डिचावर्णनम्।

वसन्तमहोत्सवमहाकाव्ये १९७० श्लोकाः १२१ छन्दोभिः विरचिताः। महाकाव्यस्य सर्वाणि लक्षणानि सन्निवेशितानि। द्वितीयसर्गे राज्ञः प्रत्यहकर्त्तव्यं, तृतीये सङ्गीतम्, चतुर्थे स्वप्नविज्ञानं, षष्ठे सुशकुन-अपशकुनविषयश्च वर्णितः। रथयात्रा-ऋतुवर्णनं-वनानी-चन्द्रालोकितरात्री च अतीवसुन्दररूपेण वर्णितः। अष्टादशसर्गे नायकानां नायिकानां लक्षणविषये उल्लिख्य तेषां शृङ्गारभावञ्च वर्णयति, नीजगन्नाथस्य यात्रादिकविषये लक्ष्मीनारायणवचनिकाप्रभृतिविषये वर्णितः।

## ३.१.२ सङ्गीतकल्पलतिका

सङ्गीतकल्पलतिकायाम् अष्टादशस्तवकाः सन्ति। तेषु सप्तस्तवकाः सङ्गीतविषये, दशस्तवकाः नृत्यविषये , एकः स्तवकः वाद्यविषये वर्णयन्ति।

तत्र विषयाः -

| | | |
|---|---|---|
| प्रथमस्तवकः | - | शुद्धगीतम् |
| द्वितीयस्तवकः | - | छायालग्नः |

| | | |
|---|---|---|
| तृतीयस्तवकः | - | क्षुद्रगीतम् |
| चतुर्थस्तवकः | - | गुणः |
| पञ्चमस्तवकः | - | दोषः |
| षष्ठः | - | रागः |
| सप्तमः | - | स्वरः |
| अष्टमः | - | वाद्यम् |
| नवमः | - | नृत्यम् |
| दशमः | - | नृत्यहस्तः |
| एकादशः | - | नृत्यशिरः |
| द्वादशः | - | नृत्यदृष्टिः |
| त्रयोदशः | - | नृत्यभूकर्म |
| चतुर्दश | - | स्थानकः |
| पञ्चदशः | - | अङ्गसञ्चारः |
| षोडश | - | करणम् |
| सप्तदश | - | स्थापकम् |
| अष्टादश | - | वाद्यम् |

ग्रन्थोऽयं सङ्गीतशास्त्रविषये उत्तमग्रन्थाः। अयं ग्रन्थः उत्कलप्रदेशेस्थितजनानां सङ्गीतशास्त्रं प्रति अभिरुचिः प्रकाशयति।

## ३.२ कविचन्द्ररायदिवाकर मिश्रः (पञ्चदश - षोडशशताब्दी)

कविचन्द्ररायदिवाकरमिश्रमहाभागाः ‘भारतामृतमहाकाव्यं’ विरच्य संस्कृतजगति प्रसिद्धोऽभवत्। अस्य महाकाव्यस्य पुष्पिकायामपि अन्यकवीनां विषये उल्लिखितमस्ति- धूर्त्तचरितभाणं, देवीशतकं, रसमञ्जरी, अभिनवगीतगोविन्दं, पारिजातहरणनाटकं, हरिचरितं च विरचितवान्।

**प्रपितामहः (सन्यासी – काशीक्षेत्रे दिवं गतः)**

**पितामहः (शिवभक्तः)**

**कविराज नारायणः** **वैदेश्वरः (पत्नी – मुक्ता)** **कविरत्न**

**कविशेखरकृष्णः मिश्रः** **कृष्णः** **मधुसूदन** **कविचन्द्ररायदिवाकरः मुकुन्दमिश्रः**

लक्षणादर्शमहाकाव्यं तेनापि रचितं यदा सः विजयनगरे आसीत्। (१५०९-१५२९ ख्रीष्टाब्द) दिवाकरमिश्रस्य अन्या एका नाटिका 'प्रभावती' इति अनन्तमिश्रः मणिमालानाटके उल्लिखितवान्।

भरद्वाजगोत्रसम्पन्नस्य द्विजकुलजातस्य दिवाकरस्य पिता वैद्येश्वरः महान् विद्वान् गुणी चासीत्। मातुः नाम मुक्ता इति। तस्य पितामहः शिवभक्तः आसीत्। प्रपितामहश्च सन्यासी भूत्वा काशीनगरे मुक्तिं लब्धवान्।

### ३.२.१ समयः

गजपतिपुरुषोत्तमदेवस्य समये (१४६६-१४९७) तस्य पृष्ठपोषकतां प्राप्य कविचन्द्ररायदिवाकरमिश्रः अभिनवगीतगोविन्दं विरचितवान्।

इदमुल्लिखितम् –

**राधामुरारि – रमणीय-रहस्यलीला**
**सन्दोह-सुन्दरममन्द-गुणाभिरामम्।**
**साहित्यसारसमुदाय बुधः प्रबन्ध-**
**मेतं तनोति पुरुषोत्तम भूमिभर्त्ता ।।**

अस्य ग्रन्थस्य पुष्पिकायां कविः लिखति "श्रीपुरुषोत्तमदेवगजपतिमहाराजकृतेऽभिनव-गीतगोविन्दे महाकाव्ये स्वाधीनभर्त्तृकावर्णने सानन्दमुकुन्दो नाम दशम सर्गः।

विजयनगरस्थ कृष्णदेवरायस्य राजसभायां १५०९-१५२९ ख्रीष्टाब्दमध्ये दिवाकरः कार्यरतः आसीत्। तस्य सम्बन्धः गजपतिप्रतापरुद्रदेवेन साकमासीदिति प्रमाणितम् पञ्चविंशति सर्गे।

"यश्चाप कविचन्द्रराय - पदवीं श्रीरुद्रभूमिभुजः। 'कविचन्द्रः' इत्युपाधिना गजपतिना प्रतापरुद्रेण दिवाकरः सम्मानितः। तस्य समयः १४९७-१५३८ ख्रीष्टाब्दः। अतः कविचन्द्रः रायदिवाकरमिश्रः उत्तरार्द्धः षोडशशताब्द्याः पूर्वार्द्धः च।

## ३.२.२ कृतयः

### ३.२.२.१ भारतामृतमहाकाव्यम्

महाकाव्येऽस्मिन् एकोनचत्वारिंशत् सर्गाः सन्ति। अस्य भाषा अतीव सरला मधुरा च। अस्य महाकाव्यस्य रचनया सः कालिदास-भारवि-माघ-श्रीहर्षप्रभृति महाकविभिः सह तुलितः। तस्य महाकाव्यं महाभारतोपरि आधारितम्। श्रीहर्षस्य नैषधीयचरितस्य प्रभावः काव्येऽस्मिन् परिलक्ष्यते। यमकालंकारस्य प्रयोगे सिद्धहस्तः।

**उत्कर्षे कवितारसस्य यमकं यस्याभिनन्दं विदुः।। (भारतामृतमहाकाव्य-सर्ग-१६)**

काव्ये यमकालङ्कारमाध्यमेन शृङ्गार-वीर-अद्भुतरसाणां वर्णनमतीवसुन्दरम्।

### ३.२.२.२ लक्षणादर्शमहाकाव्यम्

ग्रन्थोऽयं महाभारतोपरि आधारितः। भट्टिकाव्य इव अत्र विषयवस्तुवर्णनेन सह पाणिनीयव्याकरणसूत्राणां वर्णनमपि लभ्यते। तस्य सर्गाणां नामानि-

१. पाण्डवनिवासः
२. पुरीवर्णनम् (पाणिनीयसमासप्रकरणम्)

३. कृष्णपाण्डवसमागमः (पाणिनीय अलुक्समासप्रकरणम्)
४. द्रौपदीवाक्यम् (पाणिनीयप्रत्ययपादसंग्रहः)
५. बलभद्रवाक्यम् (पाणिनीयप्रत्ययपादसंग्रहः)
६. हरिव्यापारः (कर्मपादलक्ष्यसंग्रहः)
७. कृष्णकीचकाभिलाषः (कर्मपादलक्ष्यसंग्रहः)
८. द्रौपद्युपालम्भः (पाणिनीय रक्तपादलक्ष्यसंग्रहः)
९. कीचकवधः (व्यधिकारलक्ष्यसंग्रहः)
१०. भीमसेनविजयः (युष्मत्पादज्ञप्रकरणम्)
११. पाण्डवसारथ्यम् (कृत्पादप्रकरणम्)
१२. उत्तरकुमारपलायनम् (विभक्तिपादप्रकरणम्)
१३. वृहन्नलायुद्धम् (समासान्तप्रकरणम्)

त्रयोदशसर्गस्य पुष्पिकायां कवेः नाम तस्य महामहोपाध्यायोपाधिविषये लिखितम्।

## ३.२.२.३ धूर्तचरित-भाणम्

दिवाकरः एकादशसर्गे स्वयमुल्लिखितवान् यत् तेन धूर्तचरितभाणं रचितम्। एकाङ्कविशिष्टः नाटकमिदम्।

## ३.२.२.४ देवीशतकम् अथवा देवीस्तुतिः

भारतामृतमहाकाव्यस्य द्वादशसर्गे दिवाकरः देवीशतकं विरचितवानिति अलिखत्। हिमाद्रितनयायाः पार्वत्याः शतश्लोकैः स्तुतिः क्रियते। इदं काव्यमधुना नोपलभ्यते।

## ३.२.२.५ रसमञ्जरि

भारतामृतमहाकाव्यस्य एकविंशतिसर्गादिदं ज्ञायते यत् दिवाकरः पद्यावलीं रचितवान्। तस्याः नाम रसमञ्जरी। पुनः कृतिरियं विजयनगरस्य राज्ञः कृष्णदेवरायस्य कृतिरिति। दिवाकरः राज्ञः कृष्णदेवरायस्य राजसभायां सभापण्डितः आसीत्। एतत् वक्तुं शक्यते यत् दिवाकरः तस्यपृष्ठपोषकतायां लिखित्वा तस्य नाम्नि लिखितवान्। यत् किमपि भवतु, अस्य ग्रन्थस्य पाण्डुलिपिः नोपलभ्यते।

### ३.२.२.६ अभिनवगीतगोविन्दः

जयदेवरचितगीतगोविन्दकाव्यानुकरणेन अभिनवगीतगोविन्दं विरचितवान्। काव्येऽस्मिन् दशसर्गाः विद्यन्ते। अस्य काव्यस्य विषयवस्तु राधाकृष्णयोः प्रेम। प्रथमसर्गे विरहतारु नायिकायाः वर्णनम्। द्वितीयसर्गे नायिकायाः अभिलाषवर्णनो। सा नायकेन कृष्णेन साकं मिलितुमिच्छति। तृतीयसर्गे नायिका राधा अभिसारिकारूपेण कृष्णेन साकं मिलितुमिच्छति। कृष्णोऽपि आनन्दितो भवति। अस्य सर्गस्य नाम 'मुदितराघः'। चतुर्थसर्गः कलहान्तरिता वर्णने मुग्धराधः। पञ्चमसर्गः "विप्रलब्धावर्णने विदग्धमाधवः।" षष्ठसर्गः 'संक्षुब्धराधः'। सप्तमसर्गः 'विलक्ष्यपुण्डरीकाक्षः'। राधा खण्डितानायिकारूपेण चित्रिता। अष्टमसर्गे राधा मानिनीनायिकारूपेण चित्रिता। सर्गस्य नाम सोत्कण्ठवैकुण्ठः। नवमे सर्गे प्रोषितभर्तृकानायिकारूपेण राधा चित्रिता। सर्गस्य नामकरणं भवति अनुकुलराधः। दशमसर्गः नन्दमुकुन्दनाम्ना ख्यातः, यत्र राधाकृष्णयोः मिलनं भवति।

ग्रन्थेऽस्मिन् ५९ रागाः, ७२ प्रकारकाः सङ्गीताः विद्यन्ते। उत्कलप्रदेशस्य सङ्गीतशास्त्रपरम्पराविषये वर्णयति। गीतगोविन्द कथा यद्यपि वर्णिता, तथापि कविः वर्णनसमये स्वकल्पनां गृह्णाति। भगवतः सात्त्विकप्रेम साधारणजनमानसे भक्तिभावं सञ्चारयति।

विभिन्ननायिकावर्णनेन सह जनानां दशकामदशाविषये वर्णयति। जीवनस्य तत्त्वविषये कवेः चिन्ताधारा-

१. परिहरति चकोरः किं शरत्चचन्द्रकान्तिम्। (अ.गी.गो-१/२१)
२. नारीजनेऽप्यभिजने प्रणयप्रमाद। (अ.गी.गो-६/११)
३. यत् कोपं प्रणये विराजति परं वैरं भवेदन्यथा। अ.गी.गो- (७/१४)
४. प्रायो मिलन्ति विपदः सहसा जनानाम्। (अ.गी.गो- ८/३)
५. हर्म्योदरे रतिकथाः कलयन्ति धन्याः । (अ.गी.गो- ९/१२)

राधाकृष्णयोः स्नेहः यद्यपि गीतगोविन्दरीत्या वर्णयितुं प्रचेष्टे, तथापि गीतगोविन्दस्य शृङ्गारं, प्रेम, भाव, भाषा उच्चकोटिरा। तथापि ग्रन्थेऽस्मिन् कविः स्वकाल्पनिकदृष्ट्या एतत् सर्वं मनोरमरीत्या वर्णयितुं प्रचेष्टे।

## ३.२.२.७ पारिजातहरणनाटकम्

पारिजातहरणं नाम्ना सुन्दरं रसयुक्तं नाटकं कविचन्द्रः रायदिवाकरमिश्रः विरचितवान्। भारतामृतमहाकाव्यस्य त्रयत्रिंशत् सर्गस्य अन्तिमश्लोके इदं लिखितम्-

**रम्यं चाकृत पारिजातहरणं सन्नाटकं यस्त्रय –**

**स्त्रिंशतत्कृत काव्यमेष विरतिं सर्गोऽनवद्यो गतः।।**

## ३.२.२.८ हरिचरितचम्पू

भारतामृतमहाकाव्यस्य पञ्चत्रिंशत् सर्गस्य अन्तिमवाक्ये उल्लिखितमस्ति यत् रायदिवाकरमिश्रेण हरिचरितचम्पूं विरचितमिति। यथा- यश्चम्पूमकरोदरोचिकतया चारौ चरित्रे हरेः। अस्य निर्द्देशः नन्यत्र लभ्यते।

## ३.२.३ आदर्श प्रश्नाः

१. हलधरमिश्रस्य कृतीनां विषये परिचयो देयः।

२. कविचन्द्ररायदिवाकर मिश्रस्य कालनिरूपणं कुरु।

**३. अधस्तनानां संक्षिप्तविवरणीं प्रदेया-**

(क) अभिनवगीतगोविन्दः

(ख) रसमञ्जरि

## UNIT – IV कृष्णानन्दः

## ४.१ कृष्णानन्दः (चतुर्दशशतकम्)

कृष्णानन्दः सान्धिविग्रहिकमहापात्रः सहृदयानन्दमहाकाव्यं विरचितवान्। अस्य प्रथमसर्गः चौखम्बासंस्कृतग्रन्थमालातः वाराणासीतः प्रकाशितम्। सहृदयानन्दस्य अन्तिमश्लोकात् इदं ज्ञायते तस्य वंशपरम्पराविषये-

**लक्ष्मीर्यावदलकरोति हृदयं विष्णोर्नृसिंहाकृते-**

**र्यावद्विष्णुपदी च धूर्जटि जटाजुटान्तरे क्रीडति।**

**कृष्णानन्दकवेः कपिञ्जलकुलक्षीरोदशीतद्युतेः**

**स्तावद्काव्यामिदं तनोतु कृति नामन्तः प्रमोदोदयम्।। (SAM,XV.61)**

तस्य ग्रन्थस्य पुष्पिकायां इदं लिखितम्-

"इति श्रीसान्धिविग्रहिक-सकलकविकुलमौलिमण्डन श्रीकृष्णानन्दकृते सहृदयानन्दमहाकाव्ये नलचरिते श्रीनैषधैन्द्रस्य द्वितीयसाम्राज्यलाभो नाम पञ्चदशसर्गः।"

## ४.२ समयः

१३१६ तमे शकवर्षे द्वाविंशति अङ्के विछाशुक्ल एकादशीतिथौ मङ्गलवासरे वाराणसी कटकनगरस्य गजपतिनरसिंहदेवः ताम्रपत्रं प्रदत्तवान्। तस्य मन्त्री कृष्णानन्दः सान्धिविग्रहिकमहापात्रः आसीत्। तस्य ख्रीष्टीय समयः भवति १३९४ ख्रीष्टाब्दस्यनवम्बरमासस्य तृतीयदिवसः इति।

एतत् प्रतीयते यत् सः साहित्यदर्पणस्य रचयितुः विश्वनाथकविराजेन सह जडितः। कपिञ्जलगोत्रसम्पन्नः उभयः। सान्धिविग्रहिकपदेन द्वौ आस्ताम्। 'महापात्र' इति तयोः उपाधि, 'दास' इति सर्गः तयोः दुयोरेव।

श्रीहर्षविरचित नलदमयन्तीकथाम् आधारीकृत्य सहृदयानन्दमहाकाव्यं विरचितवान्। श्रीहर्षस्य समयः द्वादशशतकम्। काव्यस्यारम्भे कविना उक्तम्-

**अत्रेतिवृत्ते रचितप्रबन्धे क्रुद्धो मुधा मास्तु कविः पुराणः।**

**न स्पर्धया व्योम्नि सहस्रधाम्नः खद्योतकः स्वां द्युतिमातनोति।।** (**SAM, I.7**)

प्रसादगुणस्य वर्णनावसरे साहित्यदर्पणे विश्वनाथकविराजः कृष्णानन्दस्य श्लोकमेकं उद्धृतवान्। विश्वनाथस्य समयः पञ्चदशशतकम्। अत इदं प्रमाणितं यत् कृष्णानन्दः श्रीहर्षानन्तरं विश्वनाथकविराजात् परमेव आसीत्।

विभिन्नशिलालेखादपि तस्य समयविषये ज्ञातुं शक्यते। यथा-

सिंहाचलं मन्दिरे शिलालेखे तस्य विषये उल्लिखितमस्ति। तस्य शिलालेखस्य समयः शकवर्ष १३०८, ख्रीष्टीय १३८५ तमवर्षः।

अन्यस्मिन् शिलालेखे (१३९६ ) इदमुल्लिखितमस्ति यत् सान्धिविग्रहिककृष्णानन्द-महापुत्रस्य पुत्राय विष्णुस्तोत्रस्य आवृत्यर्थं/गानार्थं वा उपढौकनं प्रदीयते। अनेनेदमपि प्रमाणितं यत् कृष्णानन्दः सान्धिविग्रहिकरूपेण गजपतिनरसिंहदेवं (चतुर्थः) निकषा कार्यं करोति स्म। गजपतिनरसिंहदेवस्य समयः १३८५-१३९६ ख्रीष्टाब्दः। अस्मिन् समये एव सहृदयानन्द महाकाव्यं विरचितमासीत्।

## ४.३ सहृदयानन्दमहाकाव्यम्

काव्येऽस्मिन् पञ्चदशसर्गाः विद्यन्ते। प्रथमसर्गस्य शीर्षकः "नलसाम्राज्यलाभः" इति निषधदेशस्य राजा वीरसेनस्य पुत्रः अजायत। तस्य नाम नलः यस्य मृगयायां दुःसाहसिक- क्रीडाक्षेत्रे च अभिरुचिः आसीत्। एकदा मृगयार्थं गतः सः सुवर्णहंसमेकं दृष्टवान्।

द्वितीयः सर्गः "हंसदर्शनम्"। हंसः नलसमीपे वर्णयति- मर्त्यलोके असामान्या सुन्दरी दमयन्ती इति कामदेवः देवान् कथयति।

तृतीयसर्गः ‘हंससन्देशः’ दमयन्त्याः सौन्दर्यपरीक्षाणार्थं तां द्रष्टुं विदर्भनगरं गच्छति। दमयन्ती राज्ञां चित्रपटानि विलोकयन्ती यदा नलस्य चित्रपटं दृष्ट्वा हर्षिताभवत्। हंसः दमयन्त्याः रत्नमालामेकां नीत्वा नलाय प्रदत्तवान्।

चतुर्थः सर्गः ‘नलोमादः’। नलस्य दमयन्तीं प्रति अतीवानुरागं वर्णितम्।

पञ्चमसर्गः ‘दमयन्तीस्वयम्बरः’। अनेके देवाः राजानश्च तत्रागच्छन्। राजा नलः अपि तत्र गतवान्। परिशेषे दमयन्ती नलं स्वपतिरूपेण वरणं कृतवती।

षष्ठसर्गः ‘दमयन्तीपरिणयः’ नलेन सह दमयन्त्याः विवाहः, तयोः निषधदेशं प्रति प्रत्यावर्त्तनम्।

सप्तमसर्गः ‘निदाघवर्णनम्’ ।

अष्टमसर्गः ‘निषधेन्द्रवनगमनम्’ । कलियुगः नलस्यानुजं पुष्करं प्रति गत्वा नलविरुद्धे कथयति। नलः द्युतक्रीडायां पराजितो भूत्वा अरण्यं गच्छति।

नवमसर्गे ‘वनपरिभ्रमणम्’ । वने नलदमयन्तौ परिभ्रमतः। स्वपितुः गृहं गन्तुं नलः दमयन्तीं वारम्बारं कथयति। परन्तु सा न स्वीकरोति।

दशमसर्गे ‘दमयन्तीविप्रलम्भः’ वनभ्रमणसमये तयोः विच्छेदः अभवत्।

एकादशसर्गः ‘दमयन्तीविलापः’ । नलं वने न दृष्ट्वा दमयन्ती विलापमकरोत्। दुर्भाग्यवशतः विशालकाय सर्पस्य मुखे पर्वतस्य गुम्फा इति मत्वा प्राविशत्। सहसा किरातेन एकेन रक्षितः।

द्वादशसर्गः ‘वैदर्भी-विदर्भानुप्रवेशः’। नलस्यान्वेषणं कृत्वा चेदीराज्ञः आश्रयस्थले प्राविशत्। एतत् ज्ञात्वा तस्य पिता भीमः तामनयत्। नलस्यान्वेषणं च कारितवान्।

त्रयोदशसर्गः ‘कर्कोटकदर्शनम्’ । नलः कर्कोटकसर्पेण दष्टः कृष्णकायश्चाभवत्।

चतुर्दशसर्गः दमयन्तीवृत्तान्तलाभः। अयोध्यायाः राज्ञः ऋतुपर्णस्य मन्त्रीरूपेण बाहुकनाम्ना अवस्थापितः।

अन्तिम तथा पञ्चदशसर्गाः - 'निषधेन्द्र द्वितीयसाम्राज्यलाभः'। नलमप्राप्य दमयन्ती अग्निप्रवेशार्थमुद्यता। राजा ऋतुपर्णः तत्र गन्तुमैच्छत्। बाहुकरूपी नलः तेन राज्ञा सह तत्र गतवान्। तत्र नलः स्वपूर्वरूपं धृतवान्। तदनन्तरं तयोः मिलनमभवत्। तौ स्वराज्यं प्रत्यावर्त्तितवन्तौ। पुष्करं पराजित्य स्वराज्यलाभं कृत्वा आनन्देन प्रजाः पालयामास। यद्यपि अस्य महाकाव्यस्य कथावस्तु महाभारतोपरि नैषधीयचरितोपरि आधारितः तथापि महाकविः कृष्णानन्दः स्वकल्पनाशक्त्या अस्य वैशिष्ट्यं प्रतिपादयति। अस्य मुख्यः रसः शृङ्गारः। सम्भोगविप्रलम्भशृङ्गारयोः यथास्थानं वर्णनं कृतम्। स्वकाव्येन पाठकानां हृदयम् आनन्दयति।

सुन्दरवर्णनमाध्यमेन प्रसादगुणेन च काव्यस्य वर्णनमतीव रमणीयं भवति।

## ४.४ जयदेवः (द्वादशशताब्दी)

गीतगोविन्दस्य रचयिता जयदेवः पुरीमण्डलस्य प्राचीनद्याः उपत्यकायां स्थिते केन्दुविल्वग्रामे जातोऽभूत्। तस्य काव्यं गीतगोविन्दं संस्कृतसाहित्यक्षेत्रे नूतनां दिशं प्रदर्शयति। सः युगसन्धिविषये (confluence of two Epochs) कथयित्वा भारतीयगीतिसाहित्यं नूतनं दिग्दर्शनं प्रदर्शयति। तस्य काव्ये नूतनपुरातनयोः मिश्रणं दृश्यते।

## ४.५ समयः

जयदेवस्य समयविषये मतान्तरं न विद्यते।

१. गीतगोविन्दस्य पुरातन-टीका 'भावविभाविनी' उदयनाचार्येण विरचितम्। गोवर्द्धनाचार्यस्य अनुजः आसीत् उदयनाचार्यः। सः शोभनेश्वर-मेघेश्वर शिलालेखयोः रचयिता। सः अनियङ्क भीम – II) राज्ञः समये आसीत्। राज्ञः समयः ११९०-११९८ ख्रीष्टाब्दः। जयदेवः गोवर्द्धनाचार्यस्य काव्यकलाविषये आरम्भे सर्गस्य चतुर्थश्लोके कथयति। गोबर्द्धनः स्वकाव्ये व्यास-बाल्मीकि-कालिदासः-भवभूतिः-बाणभट्टःप्रभृतीनां नामानि उल्लिखितवान्। परन्तु

जयदेवस्य नाम नोल्लिखितम्। अस्मात् ज्ञायते यत् गीतगोविन्दरचना समये एव गोवर्द्धनः प्रसिद्धकविरूपेण ख्यातः आसीत्। तस्यानुजः उदयनः गीतगोविन्दोपरि टीकां विरचितवान्। अतः जयदेवः गोवर्द्धनात् परमुदयनात् प्रागेवासीत्।

२. त्रयोदशशतकस्य श्रीधरदासः 'सदुक्तिकर्णामृत' ग्रन्थे जयदेवविषयेऽपि उक्तवान्। गीतगोविन्दकाव्यस्य पञ्चश्लोकाः तेन उद्धृताः। अतः जयदेवस्य समयः द्वादशशतकं नूनं स्यात्।

३. छन्दवरदाइनाम्ना हिन्दिभाषायाः प्रख्यातः कविः पृथ्विराज चौहान् वंशविषये पृथ्विराज रासो नामकं हिन्दिभाषायां कवितां विरचितवान्। तत्र जयदेवस्य कृती विषये उल्लिखितवान्।

**जयदेव अथ कविकविरायं**

**जनै केवलं किरति गोविन्द गायं ।।**

ख्रीष्टीये ११९२ तमे वर्षे द्वितीय तिरोरीयुद्धे पृथ्विराजस्य पतनमभवत्। युद्धात् प्रागेव गीतगोविन्दस्य रचना नूनं स्यादिति जयदेवस्य समयः द्वादशशतकस्य उत्तरार्द्धः इति वक्तुं शक्यते।

जयदेवः गीतगोविन्दे उक्तं यत् सः केन्दुविल्वग्रामे जातोऽभवत्-

**वर्णितं जयदेवकेन हरेरिदं प्रवणेन**

**केन्दुविल्व समुद्रसम्भव रोहिणीरमणेन।। (गीतगोविन्द -III.10)**

केन्दुविल्वग्रामविषयेऽपि मतान्तरं दृश्यते। हरेकृष्णमुखोपाध्यायः, एस्-के चाटार्जी, पि.के दासगुप्ता च वेङ्गलप्रदेशस्य वीरभूमण्डलस्थ अजयनदीतटस्थ केन्दुविल्वग्रामं कथयन्ति। परन्तु सुकुमारसेन-केदारनाथमहापात्र-आशुतोषभट्टाचार्य-वलदेवउपाध्याय-परशुराम चतुर्वेदी- एच् हीराचान्द-वनमालीरथ –नीलमणिश्रित भगवान् पण्डा-थोमास् डोनाल्ड्सन् – रघुनाथ पण्डा प्रभृतयः विद्वांसः केन्दुविल्वविषये भिन्नमतं पोषयन्ति। उत्कलप्रदेशस्य अधुना खोर्द्धा पुरीमण्डलान्तर्गतप्राचीनद्यास्तीरे केन्दुविल्वनाम्ना ग्रामः आसीत्।

पुनः उत्कलप्रदेशस्य प्राचीनदीतीरे अनेकानि वैष्णवमन्दिरस्य भग्नावशेषानि लब्धानि। निकटस्थ निआलीग्रामे द्वादशमाधवमूर्त्तयः, माधवग्रामेऽपि माधवानन्दमन्दिरमपि अस्ति।

माधवमूर्त्तयः अत्र बहुप्रसिद्धाः। तेषु धवलमाधवः, मार्त्तण्डमाधवः, प्रियमाधवः, सुन्दरमाधवः, गुप्तमाधवः, विल्वमाधवः, ललितमाधवश्च प्रमुखाः पूजिताः भवन्ति।

माधवपूजनपरम्परा जयदेवस्य काव्ये प्रतिफलिता। केन्दुलिग्रामेस्थित जागेश्वरीमन्दिरे स्थितशिलालेखे वर्त्तते - 'जय जयदेव हरे'। एतस्मादनुमीयते यत् (शक १११२ तमे वर्षे) ११९० तमे ख्रीष्टियवर्षे मन्दिरस्य निर्माणं जयदेवस्य स्मृत्यर्थमेव निर्मितम्। पुनः केन्दुविल्वनिकटस्य प्रतापरुद्रपुरग्रामेस्थित आखण्डलेश्वरमन्दिरे भगवतः गोपिनाथस्य मूर्त्तिः विद्यते। तत्रैव अन्य एक पुरुषमूर्त्तिः। स्थानीयजनाः तं जयदेवमिति कथयन्ति।

## ४.६ जगन्नाथमन्दिरेण सह सम्पर्कः

चन्द्रदत्तः भक्तमालां विरचितवान्। यत्र जयदेवस्य पुरीस्थितजगन्नाथमन्दिरेण सह सम्पर्कः उल्लिखितः।

**निर्माय गीतगोविन्दपुस्तकं पुरुषोत्तमे।**

**निवेद्य कृतकृत्योऽभुत् जयदेवो महामना।।**

ऐतिहासिकानां मतानुसारं गङ्गवंशस्य राज्ञः नरसिंह द्वितीयस्य (ख्रीष्टिय १२७८-१३०९) समये जगन्नाथमन्दिरे गीतगोविन्दगानस्यारम्भोऽभवत्।

गीतगोविन्दस्यानुकरणेन कविचन्द्रः रायदिवाकरमिश्रः गजपति पुरुषोत्तमदेवस्य समये (१४४६-१४९७ ख्रीष्टाब्दे) गीतगोविन्दमरचयत्। जयदेवस्य गीतगोविन्दस्य गान पुर्यां श्रीमन्दिरे भगवतः जगन्नाथस्य सम्मुखे गानमभवत्। परन्तु भागवता तन्न स्वीकृतम्। अतः गजपतिपुरुषोत्तमदेवस्य पुत्रेण प्रतापरुद्रेण जयदेवगीतगोविन्दस्य गानं पुनः प्रारब्धमकरोत् १४९९ ख्रीष्टियवर्षे। एतत्तु श्रीमन्दिरेस्थित जयविजयद्वारे शिलालेखरूपेण उत्कलभाषायां विद्यते।

पुनः गजपतिप्रतापरुद्रदेव भगवान् वलभद्र-जगन्नाथयोः सम्मुखे भोग-अर्पणसमये नृत्यपरिवेषणार्थमादिष्टवान्। एतत्तु नृत्य-सन्ध्या-धूप समयात् रात्रीधूपपर्यन्तं प्रचलितमासीत्। नृत्येन साकं गीतगोविन्दस्य गायनमपि प्रचलितमासीत्।

गीतगोविन्दस्यानुकरणेन अनेके ग्रन्थाः लिखिताः। यथा-

१. अभिनवगीतगोविन्दम् – गजपतिपुरुषोत्तमदेवः - पञ्चदशशतके
२. जगन्नाथवल्लभनाटकम् – रायरामानन्दः -षोडशशतके
३. रुक्मिणीपरिणयमहाकाव्यम् – नारायण भञ्जदेव - षोडशशतके
४. पीयुषलहरिनाटिका – जयदेव (जयदेवस्य पुत्रः) - षोडश शतके
५. वैष्णवामृतनाटकम् – जयदेवः - षोडशशतके
६. छन्दोगोविन्दम् – पुरुषोत्तमभट्ट - षोडशशतकम्
७. गोपगोविन्दम् – पुरुषोत्तममिश्र – सप्तदशशतकम्
८. मुदितमाधवम् – शतञ्जीवमिश्रः - सप्तदशशतकम्
९. मुकुन्दविलासम् - यतीन्दरघुत्तमतीर्थः - सप्तदशशतकम्
१०. कृष्णविलासः - कविरत्न नारायणमिश्रः - सप्तदशशतकम्
११. श्रीकृष्णलीलामृतम् – अङ्किचित् नित्यानन्दः- सप्तदशशतकम्
१२. शिवलीलामृतम् - अङ्किचित् नित्यानन्दः- सप्तदशशतकम्
१३. केलिकल्लोलिनि – अनादिमिश्रः - सप्तदशशतकम्
१४. रासगोष्ठीरूपकम् - अनादिमिश्रः - अष्टादशशतकम्
१५. समृद्धमाधवनाटकम् – कवि भूषण गोविन्द- अष्टादश शतकम्
१६. सङ्गीतचिन्तामणि – कमललोचन खड्गराय – अष्टादशशतकम्

इत्यादयः अनेके ग्रन्थाः सन्ति।

काव्यस्यारम्भे मङ्गलाचरणे राधाकृष्णयोः प्रेमकथां सम्पूर्णं भविष्यति, तदर्थं प्राथ्यते। जयदेवः आत्मनः परिचयं प्रयच्छति। प्रथमसङ्गीतं मालवरागेण गीयते यत्तु भगवतः विष्णोः स्तुतिर्भवति।

यमुनानदीकूले गोपिभिः सह कृष्णराधायोः वर्णना। असूयाहेतोः राधा स्थानं परित्यज्य गच्छति। राधा विरहेण यमुनातीरे श्रीकृष्णः तिष्ठति। राधाकृष्णयोः विरहं वर्ण्यते। कदाचित् राधा खण्डितानायिकारूपेण, कदाचित् कलहान्तारिता-नायिकाभावेन, कदाचित् मानिनीनायिकारूपेण चित्रिता। कदाचित् स्वाधीन-भर्त्तृकारूपेणापि चित्रिता। ग्रन्थेऽस्मिन् सम्भोग-विप्रलम्भशृङ्गारयोः वर्णना विद्यते। श्लोकाः आर्या-मन्दाक्रान्ता-वसन्ततिलकाप्रभृतिभिःछन्दाभिः रचिताः। मालव-वसन्त-गुज्जरीप्रभृतिरागाणां समावेशो भवति। प्रसाद-माधुर्यगुणाभ्यां काव्यमिदम् अतीव मनोरमं भवति। अलंकारेषु विशेषभावेन छेकानुप्रास-वृत्त्यनुप्रास-अन्त्यनुप्रासः बहुलभावेन व्यवहृतम्। अर्थालङ्कारेषु उपमा-रूपक-उत्प्रेक्षा-

काव्यलिङ्ग-विशेषोक्ति-व्यतिरेक-दीपक-अर्थान्तरन्यास-समुच्चय-अनुमान-भ्रान्तिमान प्रभृतीनां  प्रयोगः दृश्यते।

## ४.६ आदर्श प्रश्नाः

१. सहृदयानन्दस्य वैशिष्ट्यं प्रतिपादयत।

२. गीतगोविन्दकारजयदेवस्य उत्कलीयत्वं प्रतिपादयत।

**३. अधस्तनानां संक्षिप्तविवरणीं प्रदेया-**

(क) कृष्णानन्दः

(ख) गीतगोविन्दः

## 4.7 Further Reading


1. Panda, P.K. Contribution of Orissa to Sanskrit Creative literature, Delhi : Pratibha Prakasan, 1987
2. Panda, R.N. Contribution of Orissa to Sanskrit Lyrics, Bhubaneswar, Ph.D thesis of Utkal University, 1992.
3. Panigrahi, K.C. History of Orissa. Cuttack: Kitab Mahal, 1981.
4. Pradhan, Atulchandra.Odisara Itihasa (Oriya), Bhubaneswar: Panchasila, 1992.
5. Upadhyaya, Baldeva. Samskrta Sahitya Ka Itihas (Hindi), Varanasi: Sarada Niketan, Reprint,1990.